।।श्रीः।।

।।श्रीदिग्विजयरामो विजयते।।

।।श्रीबदरीनारायणो विजयते ।।



श्रीबदरीक्षेत्रमाहात्म्यसङ्ग्रहः

(हरिद्वारादिक्षेत्रमाहात्म्येन विलसितः)

सङ्ग्रहः

श्रीजयतीर्थविद्यापीठम्,

उत्तरादिमठः,

बेङ्गळूरु

विषयानुक्रमणिका

।।श्रीः।।

।।श्रीदिग्विजयरामो विजयते।।

।।श्रीबदरीनारायणो विजयते ।।



श्रीबदरीक्षेत्रमाहात्म्यसङ्ग्रहः

दानतीर्थतपोयज्ञपूर्वाः सर्वेऽपि सर्वदा ।

अङगानि हरिसेवायां भक्तिस्त्वेका विमुक्तये ।।

तीर्थयात्रायाः आवश्यकता

स हरिर्ज्ञायते साधुसङ्गमात् पापवर्जितात्। येषां कृपातः पुरुषाः भवन्त्यसुखवर्जिताः।।

ते साधवः शान्तरागाः कामलोभविवर्जिताः । ब्रुवन्ति यन्महाराज तत् संसारनिवर्तकम् ।।

तीर्थेषु लभ्यते साधू रामचन्द्रपरायणः । यद्दर्शनं नृणां पापराशिदाहशुशुक्षणिः ।।

तस्मात् तीर्थेषु गन्तव्यं नरैः संसारभीरुभिः । पुण्योदकेषु सततं साधुश्रेणिविराजिषु ।।

(पद्मपुराणम्–पातालखण्डः)

मानसतीर्थस्नानम्

सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदया तीर्थं तीर्थमार्जवमेव वा ।।

दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता ।।

ज्ञानं तीर्थं धृतिस्तीर्थं तपस्तीर्थमुदाहृतम् । तीर्थानामपि तत्तीर्थं विशुद्धिर्मनसः पराः ।।

न जलाप्लुतदेहस्य स्नानमित्यभिधीयते । स स्नातो यो दमस्नातः शुचिः शुद्धमनोऽमलः ।।

न शरीरमलत्यागान्नरो भवति निर्मलः । मानसे तु मले त्यक्ते भवत्यन्तः सुनिर्मलः ।।

ध्यानपूते ज्ञानजले रागद्वेषमलापहे । यः स्नाति मानसे तीर्थे स याति परमां गतिम् ।।

(स्कन्दपुराणम्–काशीखण्डः)

तीर्थक्षेत्रफलाधिकारी

गङ्गादितीर्थेषु वसन्ति मस्त्याः देवालये पक्षिगणाश्च सन्ति ।

भावोज्झितास्ते न फलं लभन्त तीर्थाच्च देवायतनाच्च मुख्यात् ।।

भावं ततो हृत्कमले निधाय तीर्थानि सेवेत समाहितात्मा ।।

सर्वोत्कृष्टतीर्थम्

यावन्ति भुवि तीर्थानि जम्बूद्वीपे तु सर्वदा । तानि तीर्थानि तत्रैव विष्णोर्नामसहस्रकम् ।।

तत्रैव गङ्गा यमुना च वेणी गोदावरी तत्र सरस्वती च ।

सर्वाणि तीर्थानि वसन्ति तत्र यत्र स्थितं नामसहस्रकं तत् ।।

।।श्रीः।।

श्रीमायापुरी(हरिद्वारक्षेत्रम्)

स्वर्गद्वारेण तत्तुल्यं गङ्गाद्वारं न संशयः । तत्राभिषेकं कुर्वीत कोटितीर्थे न संशयः ।।

लभते पुण्डरीकं च कुलं चैव समुद्धरेत् । तत्रैकरात्रिवासेन गोसहस्रफलं लभेत् ।।

सप्तगङ्गे त्रिगङ्गे च शक्रावर्ते च तर्पयन् । देवान् पितॄंश्च विधिवत् पुण्ये लोके महीयते ।।

ततः कनखले स्नात्वा त्रिरात्रोपोषितो नरः । अश्वमेधमवाप्नोति स्वर्गलोकं च गच्छति ।।

हरिद्वारक्षेत्रमाहात्म्यम्

अयोध्या मधुरा **माया** काशी काञ्ची ह्यवन्तिका ।

पुरी द्वारावती चैव सप्तैता मोक्षदायकाः ।।

गंगाद्वारे कुशावर्ते बिल्वके नीलपर्वते ।

स्नात्वा च कनखले तीर्थे पुनर्जन्म न विद्यते ।।

गङ्गाद्वारम् (ब्रह्मकुण्डम्)–ಭಗೀರಥ ಗಂಗೆಯನ್ನ ಭುವಿಗಿಳಿಸಿದ ನಂತರ ಶ್ವೇತನೆಂಬುವ ರಾಜನು ಬ್ರಹ್ಮನನ್ನು ಕುರಿತು ತಪಸ್ಸನ್ನಾಚರಿಸಿದನು.ಸಂತುಷ್ಟನಾದ ಬ್ರಹ್ಮನು ನಿನ್ನಹೆಸರಿನಿಂದಲೇ ಆ ಸ್ಥಳ ಪ್ರಸಿದ್ಧವಾಗಲೆಂದು ಆ ರಾಜ ಕೇಳಿದಾಗ ವರವನ್ನು ಕೊಟ್ಟನು. ಅಂದಿನಿಂದ ಇದು ಬ್ರಹ್ಮಕುಂಡ ಎಂಬುದಾಗಿ ಪ್ರಸಿದ್ಧವಾಯಿತು .

कुशावर्ततीर्थम् – ದತ್ತಾತ್ರೇಯಮುನಿ ಒಂಟಿಕಾಲಿನಲ್ಲಿ ತಪವನ್ನು ಮಾಡುತ್ತಾ ಕುಶಪುಷ್ಪಗಳಿಂದ ಅರ್ಚನೆಗೈಯುತ್ತಿರುವಾಗ ಗಂಗೆಯ ರಭಸದಿಂದ ಪೂಜಾಸಾಮಗ್ರಿಗಳೆಲ್ಲಾ

ನೀರಿನಲ್ಲಿ ಕೊಚ್ಚಿಕೊಂಡು ಹೋಯಿತು. ತಮ್ಮ ತಪಸ್ಸಾಮರ್ಥ್ಯದಿಂದ ಗಂಗೆ ಮುಂದೆ ಹರಿಯದೇ ಬುಗುರಿಯಂತೆ ತಿರುಗಲಾರಂಭಿಸಿತು.ಆಗ ಋಷಿಯು ಇದಕ್ಕೆ ಕುಶಾವರ್ತ ಎಂದು ಹೆಸರನ್ನು ನೀಡಿದನು.

बिल्वकक्षेत्रम्- ಬ್ರಹ್ಮಕುಂಡದ(ಹರ್‌ಕೀಪೈಡಿ)ಯ ಸಮೀಪದಲ್ಲೇ ಬಿಲ್ವಪರ್ವತವಿದೆ.ಇಲ್ಲಿ ಪೂರ್ವದಲ್ಲಿ ದೊಡ್ಡದಾದ ಬಿಲ್ವವೃಕ್ಷವಿತ್ತು.ಇಲ್ಲಿ ಒಂದು ರುದ್ರದೇವರ ದೇವಸ್ಥಾನವಿದೆ.ಆ ಶಿವಲಿಂಗದ ದಕ್ಷಿಣಭಾಗದಲ್ಲಿ ಒಂದು ದೊಡ್ಡದಾದ ಸರ್ಪ ಮಣಿಯಿಂದ ಕೂಡಿಕೊಂಡಿದ್ದಾಗಿ ಪಾತಳಕ್ಕೆ ಹೋಗಿ ಬರುತ್ತಾ ಇರುತ್ತದೆ. ಅದು ಆಗಾಗ ಪ್ರಾಣಿಯ ರೂಪದಲ್ಲಿಯೋ ಅಥವಾ ಋಷಿಯರೂಪದಲ್ಲಿಯೋ ತೀರ್ಥದಲ್ಲಿಸ್ನಾನಮಾಡಿ ಬರುತ್ತಾಯಿರುವುದು.

नीलपर्वतः–ನೀಲಪರ್ವತದ ಬಳಿಯಲ್ಲಿ ಹರಿಯುವ ನೀಲಧಾರೆಯೇ ಗಂಗೆಯ ಪ್ರಧಾನಧಾರೆ. ಶಿವನ ಗಣದಲ್ಲಿ ಒಬ್ಬನಾದ ನೀಲನೆಂಬುವನು ರುದ್ರದೇವರ ಪ್ರೀತಿಗಾಗಿ ತಪಸ್ಸನ್ನಾಚರಿಸಿದ ಸ್ಥಳ. ಆದ್ದರಿಂದ ಇದಕ್ಕೆ ನೀಲಪರ್ವತ ಎಂಬುದಾಗಿ ಹೆಸರು.

कनखलतीर्थम्- ನೀಲಧಾರಾ ಹಾಗೂ ಮತ್ತೊಂದು ಗಂಗಾಪ್ರವಾಹ ಇಲ್ಲಿ ಸೇರುತ್ತದೆ. ಆದ್ದರಿಂದ ಜೋರಾದ ಪ್ರವಾಹವಿರುತ್ತದೆ.ದಕ್ಷನ ಯಜ್ಞದಲ್ಲಿ ಸತೀದೇವಿಯು ಪ್ರವೇಶವನ್ನು ಮಾಡಿದಾಗ ರುದ್ರದೇವರು ವೀರಭದ್ರನಿಂದ ಯಜ್ಞವನ್ನು ನಾಶಮಾಡಿಸಿದಸ್ಥಳ.

सनत्कुमारतपोभूमिः,दक्षयज्ञभूमिः,ब्रह्मयज्ञभूमिः(हर् की पैडी),दत्तात्रेयतपोभूमिः(कुशावर्त), मैत्रेयेण विदुरं प्रति भागवतोपदेशभूमिः,शन्तुनुमुद्दिश्य भीष्मेण श्राद्धादिकं कृतं,युधिष्ठिरेण धृतराष्ट्रस्य अन्त्यकर्म कृतं,अजामिलस्य तु परमतपोभूमिः ।

हरिद्वारक्षेत्रस्य स्नानसङ्कल्पः

श्रीगोविन्द .. .. ..एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ । श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं ज्ञानभक्तिवैराग्यादिसिद्ध्यर्थं अन्तःकरणशुद्ध्यर्थं विष्णुवैष्णवपरिचरणयोग्यतासिद्ध्यर्थं ज्ञाताज्ञातदोषपरिहारार्थं तुलसीवृन्दावनाश्नवत्थगोब्राह्मणविष्णुवैष्णवसालिग्रामचक्राङ्कितसन्निधौ केदारखण्डे सुदर्शनक्षेत्रे मायापुरीनामकमुक्तिदायके हरिद्वाराख्ये क्षेत्रे श्रीमन्नारायणपादोदकीभूतायां सार्धत्रिकोटितीर्थाभिमानिदेवतासन्निधानयुक्तायां गङ्गानद्यां स्नानं करिष्ये।

गङ्गास्तोत्रम्

गङ्गायां माधवो देवः शङ्खचक्रगदाधरः ।

लसत्पद्मधरो ध्येयःतत्र स्नायी नरेश्वरः ।।

योऽसौ सर्वगतो देवः चितस्वरूपी निरञ्जनः। स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः।।

नन्दिनी नलिनी सीता मालती च मलापहा । विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी ।।

भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी ।

द्वादशैतानि नामानि यत्र यत्र जलाशये ।।

स्नानकाले पठेन्नित्यं तत्र तत्र वसाम्यहम्।।

गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि ।

मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ।।

यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।।

त्वं दीनेषु दयावतीति विदितं यद्ब्रह्महस्ताश्रयम्

प्राप्ताथाच्युतपादसङ्गमहिता पश्चाच्च नाकं श्रिता ।

सौवर्णाचलशृङ्गमेत्य मुदिता शम्भोः शिरःसङ्गता-

प्यास्माकक्षितिमण्डले त्रिपथगे तुष्टास्यभीष्टप्रदा ।।

आदौ पादतलोर्ध्वभागमहसा या रक्तनीला हरेः

स्वर्गस्त्रीकुचकुङ्कुमाङ्कनयनोपान्तश्रियाभ्यन्तरे ।

अन्ते शम्भुकपर्दपन्नगगलश्रेणीज्ज्वलज्ज्योतिषा

जन्मारभ्य सरस्वतीनतनयासङ्गेव गङ्गास्ति सा ।।

अज्ञानाद्यदि सज्जनेषु रचितद्रोहान्मयि स्वर्धुनि

स्वस्फूर्त्या सुजनेषु दूषणगणारोपादवज्ञा तव ।

तर्हि त्वां सगरात्मजास्थिनिकरा जानन्ति किं तैःप्रभोः

द्रोहःकिं न कृतः किमम्ब न हरावारोपिता चोरता ।।

आरभ्याब्जजलोकमाक्षितितलादायातया किं तया

मच्चित्तं बहुदूरमित्यमलया त्यक्तं भिया जाह्नवि ।

अक्षय्याचलतुङ्गशृङ्गनिकरान्निर्भिद्य यान्ती मम

स्वल्पं किं बहु मन्यसेऽशुभकुलं गङ्गेऽन्तरङ्गे चलम् ।।

अस्थिस्पर्शनमात्रतः किमु तव श्रेयप्रदत्वं गतम्

विस्तीर्णा न किमच्युतस्य नगरी मन्मात्रदेशोज्झिता ।

तद्वर्त्मापि सकण्टकं किमु सतां सन्तानजोऽहं न किम्

कस्मादम्ब न मे प्रदास्यसि पदं गङ्गेऽखिलार्थप्रदम् ।।

हे गङ्गे तव कोमलाङ्घ्रिनलिनं रम्भोरु नीवीलसत्-

काञ्चीदाम तनूदरं घनकुचव्याकीर्णहारं वपुः।

सन्मुद्राङ्गदकङ्कणावृतकरं स्मेरं स्फुरत्कुण्डलम्

सारङ्गाक्षि जलान्यदिन्दुरुचि ये जानन्ति तेऽन्ये जलात् ।।

श्रीनारायणरामगोपतिहृषीकेशादिरूपोऽक्षमः

त्वां हातुं हरिसूकराकृतिरथ श्रीदेवहूत्यात्मजः ।

वेणीमाधवबिन्दुमाधवतनुस्तीरे व्यधत्त स्थितिम्

गङ्गे किं बहुनाऽधुनापि वसति त्वद्भर्तृगेहेऽप्यसौ ।।

गङ्गे त्वं शुभसञ्चयस्य जयदा दोषात्मनां नत्विति

ज्ञातं यत्क्रतुकोटिलभ्यसुकृतस्यभ्युन्नतिं यच्छसि।

दुष्कर्माण्यमितानि दूरयसि यत् त्वद्गेयतोयेक्षया

पानेनाप्यवगाहनेन मनसा ध्यानेन गानेन वा ।।

षट्प्रयागाः

षट्प्रयागाः स्ववेगेन कामाद्यरिमहीरुहः ।

उन्मूलयन्तु पापाख्यं पङ्कं प्रक्षालयन्तु वः ।।

देवप्रयागः- अलकनन्दा,भागीरथीसंगमः

रुद्रप्रयागः- अलकनन्दा,मन्दाकिनीसंगमः

कर्णप्रयागः- अलकनन्दा,पिण्डर्संगमः

नन्दप्रयागः- अलकनन्दा,नन्दाकिनीसंगमः

विष्णुप्रयागः- अलकनन्दा,धूलीगंगासंगमः

केशवप्रयागः- अलकनन्दा,सरस्वतीसंगमः

ज्योतिर्मठ (जोषीमठ)परिचयः

ततः क्रोशद्वये पुण्यं **ज्योतिर्धाम** शुभप्रदम् । नृसिंहरूपी भगवान् यत्रास्ति मुक्तिदायकः ।।

ಕಾರ್ತಿಕಮಾಸದಿಂದ ಆರು ತಿಂಗಳು ಶ್ರೀಬದರೀನಾರಾಯಣನ ಉತ್ಸವಮೂರ್ತಿಯೊಂದನ್ನು ಇಲ್ಲಿ ಇಟ್ಟು ಪೂಜಿಸುತ್ತಾರೆ. ಇಲ್ಲಿಯೇ ನರಸಂಹದೇವರ ಸಾಲಿಗ್ರಾಮಶಿಲೆಯ ಮೂರ್ತಿ ಇದೆ. ಅಲ್ಲಿಯ ಹೇಳಿಕೆ ಹೀಗಿದೆ. ನರಸಿಂಹದೇವರ ಒಂದು ಭುಜ ಬಹಳ ತೆಳುವಾಗಿದೆ. ಪೂಜೆಯ ಸಮಯದಲ್ಲಿ ಯಾವಾಗಾದರೋ ಅದು ಶಿಲೆಯಿಂದ ಬೇರೇ ಆಗಬಹುದು. ಅವತ್ತಿನ ದಿವಸ ಒಂದು ಆಶ್ಚರ್ಯ ಸಂಭವಿಸುವುದು.ಬದರೀಕ್ಷೇತ್ರದಲ್ಲಿರುವ ನರನಾರಾಯಣಪರ್ವತ ವಿಷ್ಣುಪ್ರಯಾಗದೊಡನೆ ಸೇರಿಹೋಗುತ್ತದೆ.ಅಂದಿನಿಂದ

ಬದರೀಕ್ಷೇತ್ರದರ್ಶನ ನಿಂತುಹೋಗುತ್ತದೆ.ಭವಿಷ್ಯಬದರೀಯಲ್ಲಿ ನಾರಾಯಣನ ದರ್ಶನವಾಗುತ್ತದೆ. ಜೋಷೀಮಠದಿಂದ 6 ಮೈಲುದೂರದಲ್ಲಿ ತಪೋವನ ಎಂಬುವ ಗ್ರಾಮವಿದೆ.ಅಲ್ಲಿಯೂ ತಪ್ತಕುಂಡವಿದೆ. ಆ ತಪೋವನದಿಂದ 3 ಮೈಲುದೂರದಲ್ಲಿ ವಿಷ್ಣುಮಂದಿರವಿದೆ.ಇದೇ ಭವಿಷ್ಯಬದರೀಕ್ಷೇತ್ರ.ಇಲ್ಲಿ ವೃಕ್ಷದ ಕೆಳಗೆ ಒಂದು ಶಿಲೆ ಇದೆ. ಅದು ನಾರಾಯಣನ ಅರ್ಧಭಾಗದ ಧ್ಯಾನಮುದ್ರೆ ಉಳ್ಳ ಆಕೃತಿ. ಇನ್ನು ಮುಂದೆ ಈ ಶಿಲೆ ಪೂರ್ಣರೂಪದಲ್ಲಿ ಮೂಡಿಬರುತ್ತದೆ.ಅಂದಿನಿಂದ ಈ ಭವಿಷ್ಯಬದರೀಯಾತ್ರೆ ಪ್ರಾರಂಭವಾಗುತ್ತದೆ.

श्रीपाण्डुकेश्वरक्षेत्रम्

ಜೋಷೀಮಠದಿಂದ 23ಕಿ.ಮೀ. ದೂರದಲ್ಲಿ ಬದರೀಕ್ಷೇತ್ರದ ಕಡೆಗೆ ಪಾಂಡುಕೇಶ್ವರ ಎನ್ನುವ ಕ್ಷೇತ್ರವಿದೆ.ಅಲ್ಲಿ ಪಾಂಡುರಾಜನು ತನಗೆ ಕಿಂದಮ ಋಷಿಗಳಿಂದ ಶಾಪಬಂದ ಅನಂತರಕಾಲದಲ್ಲಿ ವಾಸಿಸಿದ್ದನೆಂದು ಮಹಾಭಾರತ , ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯನಿರ್ಣಯ ಮತ್ತು ತಾತ್ಪರ್ಯನಿರ್ಣಯ ಭಾವಪ್ರಕಾಶಿಕೆಯಿಂದ ತಿಳಿಯುತ್ತದೆ.

न्यसिष्णुरुक्तःपृथया स नेति प्रमाणपूर्वं न्यवसत्तथैव ।

ताभ्यां समेतः शतशृङ्गपर्वते नारायणस्याश्रममध्यगे पुरः ।। – म.भा.ता.नि.

इत्यत्र सपादलक्षशृङ्गवत्वात् पूर्वपरवारिधिपर्यन्तं महान् सपादलक्षाख्यः पर्वतोऽस्ति । तन्मध्ये शतशृङ्गाख्योऽवान्तरपर्वतः। तस्य मध्ये पूर्वतः पश्चिमतश्च नरनारायणशृङ्गाभ्यां मध्ये अलकनन्दया चालङ्कृतः बदरिकाख्यनारायणाश्रमस्तिष्ठति । तस्य दक्षिणभागे योजनप्रमाणात् अधस्तात् पाण्डुचक्रवर्तिना अधिष्ठितत्वात् **पाण्डुकेश्वराख्यं** पुण्यक्षेत्रं च वर्तते।इति वस्तुस्थितिः।। म.भा.ता.नि.भावप्रकाशिका

श्रीबदरीक्षेत्रमाहात्म्यम्

श्री बदरीक्षेत्रस्य माहात्म्यं महाभारत,हरिवंश,श्रीस्कान्दस्य वैष्णवखण्डे , केदारखण्डे, वराह, नारदीय,विष्णुधर्मोत्तर,श्रीविष्णु,श्रीमद्भागवत,सनत्कुमारसंहितादिषु इतिहासपुराणेषु , तथा श्रीमन्मध्वविजये,तीर्थप्रबन्धे च बहुतरं वर्णितम् ।

बदरीक्षेत्रविषये कथा अनेकाः श्रूयन्ते तत्र तत्र पुराणेषु ।

हरिवंशे – श्रीकृष्णस्य कैलासयात्राप्रसङ्गे बदरीक्षेत्रदर्शनं ,तत्रस्थमुनिगणैः अर्घ्यपाद्यादिभिः कृष्णस्य स्वागतं,तत्र पिशाचानां कोलाहलः, तदा घण्टाकर्णसमागमः,तेन विष्णुस्तुतिः, तस्य विष्णुसाक्षात्कारः,बदरीक्षेत्रे घण्टाकर्णस्य मुक्तिप्रदानम् इत्यादि श्रूयते।

अमरीभ्रमरीपुञ्जसुमरीचिभिरञ्चिता । बदरी वद रे किं किमधरीकुरुते न सा ।।

यत्र क्षेत्रे विधेः सत्रे हयग्रीवो ह्यवातरत् ।

धाराद्वारा त्रयी तत्र श्रूयतेऽद्यापि सूरिभिः ।।

श्रीबदरीक्षेत्रे स्नानसङ्कल्पः

शुभे शोभने .. .. भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गतहिमवत्पर्वतैकदेशे नरनारायणपर्वतयोर्मध्ये पञ्चशिलान्तर्गततप्तकुण्डाख्यवह्नितीर्थे उद्धवकुबेरगणेशगरुडनारदादिसहितश्रीबदरीनारायणक्षेत्रे ... ...संवत्सरे... ... ...शुभतिथौ। श्रीगोविन्द .. .. ..एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ । श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं ज्ञानभक्तिवैराग्यादिसिद्ध्यर्थं अन्तःकरणशुद्ध्यर्थं विष्णुवैष्णवपरिचरणयोग्यतासिद्ध्यर्थं ज्ञाताज्ञातदोषपरिहारार्थं तुलसीवृन्दावनाश्वत्थगोब्राह्मणविष्णुवैष्णवसालिग्रामचक्राङ्कितसन्निधौ

श्रीमन्नारायणपादोदकीभूतायां सार्धत्रिकोटितीर्थाभिमानिदेवतासन्निधानयुक्तायां अलकनन्दानामिकायां गङ्गानद्यां स्नानं करिष्ये।

श्रीबदरीक्षेत्रपरिचयः

गङ्गा यत्र सरिच्छ्रेष्ठा मध्ये धावति पावनी ।

यत्रः शक्रः स्वयं हत्वा वृत्रं वेदार्थतत्त्वगम् ।।......................**हरिवंशे**

एषा हि महती पुण्या नानाविप्रनिषेविता ।

बदरीयं समाख्याता न क्षुद्रैराश्रिता क्वचित् ।।.........श्रीकृष्णः घण्टाकर्णं प्रति **(हरिवंशे)**

स्कन्द उवाच

क्षेत्राणि कानि पुण्यानि तीर्थानि सरितस्तथा ।

केन वा प्राप्यते साक्षात् भगवान् मधुसूदनः । श्रद्धधानाय भगवन्कृपया वद मे पितः ।।

महादेव उवाच

बदर्याख्यं हरेः क्षेत्रं त्रिषु लोकेषु दुर्लभम्। क्षेत्रस्य स्मरणादेव महापातकिनो नराः ।।

बहूनि सन्ति तीर्थानि दिवि भूमौ रसातले । बदरीसदृशं तीर्थं न भूतं न भविष्यति ।।

अश्वमेधसहस्राणि वायुभोज्ये च यत्फलम् । क्षेत्रान्तरे विशालायां तत्फलं क्षणमात्रतः ।।

त्यजेत्सर्वाणि तीर्थानि काले काले युगे युगे । बदरीं भगवान् विष्णुर्न मुञ्चति कदाचन ।।

तीर्थानां वसतिर्यत्र देवानां वसतिस्तथा ।ऋषीणां वसतिर्यत्र **विशाला** तेन कथ्यते।।

–श्रीस्कान्देवैष्णवखण्डे

तप्तकुण्डवृत्तान्तं

स्कन्द उवाच

कथं वैश्वानरः श्रीमान् सर्वलोकैककारणं । बदरीमनुसंतस्थौ तन्मे वद महामते ।।

महादेव उवाच

पुरा समाजः समभूत् ऋषीणामूर्ध्वरेतसाम् । गंगा भगवती यत्र कालिन्द्या सह संगता ।।

दशाश्वमेधिकं नाम तीर्थं त्रैलोक्यविश्रुतम् । बभूव तत्र भगवान् हुतभुक् प्रश्रयानतः ।।

ऋषीणामग्रतः स्थित्वा प्रष्टुं समुपचक्रमे ।

अग्निरुवाच

दीनार्थे करुणापूर्णा हृदयार्द्राः कृपालवः । कथं स्यान्निरयान्मुक्तिः मम ब्रह्मविदुत्तमाः ।।

सर्वेषामृषिवर्याणां आजगाम मुनीश्वरः । गंगांभसि समाप्लुत्य वाक्यं चेदमुवाच ह ।।

व्यास उवाच

अस्त्येकः परमापायो भवतः पापनिष्कृतौ । सर्वभक्षाख्यदोषस्य **बदरीं** शरणं व्रज ।।

तत्र गंगांभसि स्नात्वा कृत्वा प्रदक्षिणं हरेः । दण्डवत्प्रणिपातेन सर्वपापक्षयो भवेत् ।।

(अग्निः तथा करोति) श्रीनारायण उवाच

वरं वरय भद्रं ते वरदोऽहमुपागतः । स्तवेनानेन तुष्टोऽस्मि विनयेन तवानघ ।।

अग्निरुवाच

ज्ञातं भगवता सर्वं यदर्थमहमागतः । तथापि कथयाम्येतदीश्वराज्ञानुपालनम् ।।

सर्वभक्षो भवाम्येव निष्कृतिस्तु कथं भवेत् । अत्यन्तभयसम्पत्तिरेतस्माज्जायते मम ।।

श्रीनारायण उवाच

क्षेत्रदर्शनमात्रेण प्राणिनां नास्ति पातकम् । मत्प्रसादात् पातकं तु त्वयि मास्तु कदाचन ।।

ततःप्रभृति भूतात्मा पावकः सर्वतो भृशम् । कलयावस्थितश्चात्र सर्वदोषविवर्जितः ।।

य एतत्प्रातरुत्थाय श्रृणोति श्रावयेच्छुचिः । अग्नितीर्थकृतस्नानफलं प्राप्नोत्यसंशयम् ।।

तन्महिमा

प्रायश्चित्तेन यत्पापं न गच्छेन्मरणान्तिकम् । स्नानमात्रेण तीर्थस्य पावकस्य विशुद्ध्यति ।।

अत्यन्तमलसंबद्धं यथा शुद्ध्यति हाटकम् । तथाग्नितीर्थमासाद्य देही पापैर्विशुद्ध्यति ।।

कुशाग्रेणोदबिन्दुं च पीत्वा वर्षत्रयं नरः । अन्यक्षेत्रे तपः कृत्वा तदत्र स्नानमात्रतः ।।

चान्द्रायणसहस्रैस्तु कृच्छ्रैः कोटिभिरेव वा । यत्फलं लभते मर्त्यः तत्स्नानाद्वह्नितीर्थतः ।।

ज्ञानेन मोहवशतः पापं कुर्वन्ति येऽधमाः । पैशाचीं योनिमायान्ति यावदिन्द्राश्चतुर्दश ।।

अनाश्रमी चाश्रमी वा यावद्देहस्य धारणम् । न तीर्थे पावके कुर्यात् पातकं बुद्धिपूर्वकम् ।।

शिलापञ्चकमध्यस्थं सान्निध्यं नित्यदा हरेः । तत्रैव पावकं तीर्थं सर्वपापप्रणाशनम् ।।

–(श्रीस्कान्दे केदारखण्डे)

ब्रह्मकपालवृत्तान्तं

पुरा कृतयुगस्यादौ स्वीयां दुहितरं विधिः । रूपयौवनसम्पन्नां स तां यमितुमुद्यतः ।।

तं दृष्ट्वा तादृशं रोषाच्छिरः खड्गेन पञ्चधा । चिच्छेदाहं कपालं तद्ब्रह्महत्या समुद्यते ।।

हस्ते कृत्वा जगामाशु तत्र तीर्थानि सेवितुम् । दिवि भूमौ च पाताले तपश्चरणपूर्वकम् ॥

न गता ब्रह्महत्या मे कपालं तादृशं करे । तदा वैकुण्ठमगमं द्रष्टुं लक्ष्मीपतिं हरिम् ॥

विनयावनतो भूत्वा नमस्कृत्य पुनःपुनः । सर्वमाख्यातवांस्तस्मै व्यसनं करुणात्मने ॥

तस्योपदिष्टमादाय बदरीं समुपागतः । तत्क्षणाद्ब्रह्महत्या मे वेपमाना मुहुर्मुहुः ॥

अन्तर्हितं कपालं तत्करद्विगलितं मम । **–(श्रीस्कान्दे वैष्णवखण्डे)**

तन्महिमा

पिंडं विधाय विधिवत् नरकात्तारयेत् पितॄन् । पितृतीर्थमिदं प्रोक्तं गयातोऽष्टगुणाधिकम् ॥

तिलतर्पणतो यान्ति पितरः स्वर्गमुत्तमम् । .. .. .. **श्रीस्कान्दे वैष्णवखण्डे**

ब्रह्मकपाले पितरः प्रेक्षमाणाः स्ववंशजम् । तिष्ठन्ति तस्मात्पिण्डानां प्रदानं मुनयोऽब्रुवन् ॥

अज्ञानात् ज्ञानतो वापि भक्त्याऽभक्त्याथ वा पुनः । यैरत्र पिण्डवपनं कृतं जलसुतर्पणम् ॥

तारिताः पितरस्तेन दुर्गता अपि पापिनः । किं गयागमनाद्देवि किमन्यत्तीर्थतर्पणैः ॥

यैर्नैर्ब्रह्मकापाले पितॄनुद्दिश्य भामिनि । कृतं तत्सर्वमेवासौ कोटिकोटिगुणं भवेत् ॥

तस्मात्सर्वप्रयत्नेन कुर्यादत्र सुतर्पणम् । पिण्डानां पातनं चैव पितरो मुक्तिमाप्नुयुः ॥

मातृवंश्याश्च ये केचित् पितृवंशयास्तथापरे ।

श्यालाः संबन्धिनो वापि सखायश्चापि भामिनि ॥

प्रिया वृक्षा पक्षिणश्च तिर्यग्योनिगता अपि । गच्छन्ति परमं स्थानं तद्विष्णोः परमं पदम् ॥

यानुद्दिश्य च सलिलं पिण्डदानं तथैव च । कृतं ते विष्णुलोकाय गच्छति स्मरणादपि ॥

नित्यं जल्पन्ति पितरो मद्वंशे कश्चिदुत्तमः।

गमिष्यति विशालायां यो तारितास्तेन वै वयम् ।।

–श्रीस्कान्दे केदारखण्डे

शिलापञ्चकवृत्तान्तम्

नारदी नारसिंही च वाराही गारुडी तथा । मार्कण्डेयेति विख्याताः शिलाः सर्वार्थसिद्धिदाः ।।

१.नारदशिला–

नारदो भगवांस्तेपे तपः परमदारुणम् । दर्शनार्थं महाविष्णोः शिलायां वायुभोजनः ।।

षष्टिवर्षसहस्राणि शिलायां वृक्षवृत्तिमान् । तदासौ भगवान् विष्णुः तत्र ब्राह्मणरूपधृक् ।।

नारद उवाच

को भवान् विजनेऽरण्ये ममानुग्रहतत्परः । मनःप्रसन्नतामेति दर्शनात्ते द्विजोत्तम ।।

इत्युक्तो नारदेनासौ शंखचक्रगदाधरः । पीतांबरलसत्पद्मवनमालाविभूषणः ।।

दर्शयामास रूपं स्वं नारदाय कृपार्दितः । तं दृष्ट्वा सहसोत्थाय तनुं प्राण इवागतः ।।

कृतांजलिपुटो भूत्वा नमस्कृत्य पुनःपुनः । तुष्टाव प्रणतो भूत्वा जगतामीश्वरेश्वरम् ।।

श्रीभगवानुवाच

तुष्टोऽहं तपसानेन स्तोत्रेण तव नारद । वरं वरय भद्रं ते वरदोऽहं तवाग्रतः ।।

नारद उवाच

वरदो यदि मे देव वरार्हो यदि वाप्यहम् । भक्तिं तव पदाम्भोजे निश्चलां देहि मे विभो ।

मच्छिलासन्निधानं च न त्याज्यं ते कदाचन ।

मत्तीर्थदर्शनात् स्पर्शात् स्नानात् आचमनात्तथा ।।

देहैर्न युज्यते देयस्तृतीयस्तु वरो मम ।।

श्रीभगवानुवाच

एवमस्तु तव स्नेहात्तव तीर्थे वसाम्यहम् ।।

ತಪ್ತಕುಂಡದ ಮುಂಭಾಗದಿಂದ ಅಲಕನಂದಾ ನದಿಯ ವರೆಗೂ ಈ ಶಿಲೆ ಇದೆ.ಇದರ ಕೆಳಗೆ ಅಲಕನಂದೆಯಲ್ಲಿ ನಾರದಕುಂಡವಿದೆ.

२.मार्कण्डेयशिला–

पुरा त्रेतायुगस्यान्ते मृकण्डुतनयो महान् । स्वल्पायुषं निजं ज्ञात्वा जजाप परमं जपम् ।।

मार्कण्डेय उवाच

यदि तुष्टो भवान् मह्यं भगवन् दीनवत्सल । निश्चलां देहि मे भक्तिं पूजायां दर्शने तव ।।

शिलायां तव सान्निध्यं एष एव वरो मम ।।

ನಾರದಕುಂಡದ ಬಳಿಯಲ್ಲಿಯೇ ಅಲಕನಂದೆಯಲ್ಲೇ ಈ ಶಿಲೆ ಇದೆ.

३.गरुडशिला–

बदर्या दक्षिणे भागे गन्धमादनशृङ्गके । गरुडस्तप आतेपे हरिवाहनकाम्यया ।।

त्रिंशद्वर्षसहस्राणि हरिदर्शनलालसः । ततस्तु भगवान् साक्षात् पीतवासा निजायुधः ।।

व्रियतां वर इत्युक्तो गरुडो हरिणा ततः । तवैकवाहनः श्रीमान् बलवीर्यपराक्रमः ।।

अजेयो देवदैत्यानां स्यामहं ते प्रसादतः । **इयं मन्नामविख्याता सर्वपापहरा शिला** ।।

एतस्याः स्मरणात्पुंसां विषव्याधिर्न जायताम् । बदरीं त्वं प्रयाहीति नारदेन निषेविताम् ।।

ಇದರ ಕೆಳಭಾಗದಿಂದಲೇನೇ ನೀರು ತಪ್ತಕುಂಡಕ್ಕೆ ಹೋಗುತ್ತದೆ.

४.वराहशिला–

रसातलात्समृद्धृत्य महीं दैवतवैरिणम् । हिरण्याक्षं रणे हत्वा बदरीं समुपागतः ।।

शिलारूपेण भगवान् स्थितिं तत्र चकार ह । तत्र गत्वा तु मनुजः स्नात्वा गंगाजलेऽमले ।।

ಅಲಕನಂದೆಯಲ್ಲಿ ಇರುವ ದೊಡ್ಡ ಶಿಲೆ ಇದೇ.

५.नरसिंहशिला–

हिरण्यकशिपुं हत्वा नखाग्रेणैव लीलया । क्रोधाग्निना प्रदीप्तांगः प्रलयानलसन्निभः ।।

ततः प्रसन्नो भगवान् नृसिंहः सिंहविक्रमः । उवाच वचनं चारु वरं मे व्रियतामिति ।।

ऋषय ऊचुः

यदि प्रसन्नो भगवन् कृपया जगतां पते । विशाला न परित्यज्या वरोऽस्माकमभीप्सितः ।।

एवमस्तु ततःसर्वे स्वाश्रमं ह्यृषयो ययुः । **नृसिंहोऽपि शिलारूपी जलक्रीडापरोऽभवत्** ।।

–श्रीस्कान्दे वैष्णवखण्डे

ನಾರದಕುಂಡದಿಂದ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಅಲಕನಂದೆಯಲ್ಲಿ ಈ ಸಿಂಹಾಕಾರದ ಶಿಲೆ ಇದೆ.

पितृतीर्थं,ब्रह्मतीर्थं,सरस्वतीतीर्थं

मानसोद्भेदनतीर्थं,गणेशतीर्थं,वैखानसतीर्थं,स्वर्णधारातीर्थं,शेषतीर्थं,सोमतीर्थं,द्वादशादित्यतीर्थं,

रुद्रतीर्थं,मौचुकुन्दतीर्थं,पाण्डवतीर्थं,द्रवधारा,वसुधारा,
भृङ्गिकुण्डं,सूर्यकुण्डं,दुर्गाकुण्डं,धनदातीर्थं,प्रह्लादकुण्डं,नारायणकुण्डं,उर्वशीकुण्डं
इत्याद्यनेकतीर्थानि बदरीक्षेत्रे सन्ति।

उर्वशीकुण्डं– ಶ್ರೀನಾರಾಯಣದೇವಸ್ಥಾನದ ಹಿಂಭಾಗದ ಪರ್ವತದಲ್ಲಿ ಚರಣಪಾದುಕಾ ಎಂಬುವ ಒಂದು ಸ್ಥಾನವಿದೆ.ಅದಕ್ಕಿಂತಲೂ ಮೇಲ್ಗಡೆ ಈ ಊರ್ವಶೀಕುಂಡ ಸಿಗುತ್ತದೆ.

सरस्वतीनदीमाहात्म्यम्

ये पुण्यवन्तोऽकलुषाः वेदवेदांगपारगाः । ते वेदघोषं विरलाः शृण्वन्त्यपि कलौ युगे ।।

केशवप्रयागः –ಅಲಕನಂದಾ ಮತ್ತು ಸರಸ್ವತೀ ನದಿಗಳ ಸಂಗಮಸ್ಥಳ ಈ ಕೇಶವಪ್ರಯಾಗ .

गणेशगुहा ,व्यासगुहा

ಅದರಬಳಿಯಲ್ಲೇ ಬೆಟ್ಟದಲ್ಲಿ **ಗಣೇಶಗುಹಾ** ಎಂಬ ಸ್ಥಳವಿದ್ದು ,ಅದು ಮಹಾಭಾರತವನ್ನು ಗಣೇಶನು ಬರೆದಸ್ಥಳ ಎನ್ನುವರು.ಗಣೇಶಗುಹೆಯಿಂದ ಕೆಲವು ಅಡಿಗಳಷ್ಟು ಎತ್ತರದಲ್ಲಿ ಪರ್ವತದಲ್ಲಿ **ವ್ಯಾಸಗುಹೆ** ಎಂಬ ಗುಹೆಯೊಂದಿದ್ದು ,ಅದನ್ನು ವ್ಯಾಸಾಶ್ರಮವೆಂದು ಕರೆಯುವರು.

मुचुकुन्दगुहा–ಅಲ್ಲಿಂದ ಮೇಲೆ ಸುಮಾರು 10 ಕಿ.ಮೀ.ಗಳಷ್ಟು ದೂರದಲ್ಲಿ ಮುಚುಕುಂದ ಮಲಗಿದ್ದ ,ಕಾಲಯವನನು ಭಸ್ಮವಾದ ,ಮುಚುಕುಂದನಿಗೆ ಶ್ರೀಕೃಷ್ಣನದರ್ಶನವಾದ **ಮುಚುಕುಂದಗುಹೆ** ಉಂಟು.

भीमसेतुः (ಭೀಮ್‌ಪೂಲ್)

ಕೇಶವಪ್ರಯಾಗದಲ್ಲಿ ಅಲಕನಂದೆಯನ್ನು ಸೇರುವ ಸರಸ್ವತಿಯು ಸುಮಾರು ಒಂದು ಕಿ.ಮೀ. ಮೊದಲು ಪರ್ವತದಿಂದ ನೂರಾರು ಅಡಿಗಳಷ್ಟು ಕೆಳಕ್ಕೆ ಧುಮುಕುವ ರುದ್ರರಮಣೀಯವಾದ ದೃಶ್ಯವನ್ನು ಕಾಣಬಹುದು.ಅದು ಧುಮುಕುವ ಸ್ಥಳದಲ್ಲೇ ಶ್ರೀಭೀಮಸೇನದೇವರು ಮಹಾಪ್ರಸ್ಥಾನಕಾಲದಲ್ಲಿ ದ್ರೌಪದೀದೇವಿಗೆ ನದಿಯನ್ನು ದಾಟುವುದಕ್ಕಾಗಿ ಒಂದು ಪರ್ವತದ ಶಿಖರವನ್ನು ಮುರಿದಿಟ್ಟು ಸೇತುವೆಯಾಗಿ ನಿಲ್ಲಿಸಿರುವ **ಭೀಮಸೇತು** ಎಂಬ ಸೇತುವೆ ಇದೆ.ಜಗತ್ತಿನ ಯಾವ ಪ್ರಸಿದ್ಧ ಜಲಪಾತಕ್ಕೂ ಇಂಥಹಾ ಏಕಶಿಲೆಯ ಸೇತುವೆ ಇರುವುದಿಲ್ಲ. ಇದು ಶ್ರೀಭೀಮಸೇನದೇವರ ಅಗಾಧ ಬಲ ಹಾಗೂ ಜ್ಞಾನಿಗಳಿಗೆ ಪ್ರತ್ಯಕ್ಷ ಸಾಕ್ಷಿಯಾಗಿದೆ. ಅಲ್ಲಿಯ ಹಳ್ಳಿಯ ಜನರು ಈ ಕಥೆಯನ್ನು ತುಂಬಾ ಶ್ರದ್ಧೆಯಿಂದ ಇಂದೂ ಹೇಳುವರು.

वसुधारामाहात्म्यम्

मानसोद्भेदनात्प्रत्यक्दिशि सर्वमनोहरम् । वसुधारेति विख्यातं तीर्थं त्रैलोक्यदुर्लभम् ।।

त्रिलोक्यां सर्वतीर्थेभ्यः श्रेष्ठो बदरिकाश्रमः । श्रुत्वा तन्नारदात्सर्वे वसवः समुपागताः ।।

अत्र स्नात्वा जलं पीत्वा पूजयित्वा जनार्दनम् । इह लोके सुखं भुक्त्वा यात्यन्ते परमं पदम् ।।

अत्र पुण्यवतां ज्योतिः दृश्यते जलमध्यतः । तद्दृष्ट्वा न पुनर्भूयो गर्भवासं प्रपद्यते ।।

येऽशुद्धपितृजाः पापाः पाषण्डमतिवृत्तयः । न तेषां शिरसि प्रायः पतन्त्यापः कदाचन ।।

ये तत्र चपलास्तथ्यं न वदन्ति च लोलुपाः । परिहासपरद्रव्यपरस्त्रीकपटाग्रहाः।

वसुधाराभिधं तीर्थं सर्वपापप्रणाशनं । पापिनां मूर्ध्नि तत्तोयबिन्दवो न पतन्ति हि ।।

–श्रीस्कान्दे केदारखण्डे

वसुधाराभिधं तीर्थं दृष्टप्रत्ययकारकम् । अतिपातकिनां नृणां नास्ति मूर्ध्न्यम्बुमिन्दवः ।।

पतन्ति मुनिशार्दूल बदरीनायकाज्ञया ।।

–श्रीसनत्कुमारसंहिता

बदरीनारायणप्रदक्षिणफलम्

सशैलकानना भूमिर्दशधा दक्षिणीकृता । हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ।।

अश्वमेधे तु यत्पुण्यं वाजपेयशतेन च। हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ।।

चतुर्मासे तु यत्पुण्यं ब्रह्माण्डदानतस्तथा । हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ।।

अतिकृच्छ्रैर्महाकृच्छ्रैश्छान्दसैः सुकृतं भवेत् । हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ।।

बदरीनारायणनैवेद्यभक्षणफलम्

बाल्ययौवनवार्धक्ये यत्पापं ज्ञानतः कृतम् । नैवेद्यभक्षणाद्विष्णोर्बदर्यां तद्विलीयते ।।

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । नैवेद्यभक्षणाद्विष्णोर्बदर्यां यांति संक्षयम् ।।

हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः । पादोदकं सनिर्माल्यं मस्तके यस्य सोऽच्युतः ।।

–श्रीस्कान्दे वैष्णवखण्डे

श्रोत्रियत्वाभिमानेन यस्त्यजेद्बदरीं गतः । नारायणस्य नैवेद्यं स महापातकी भवेत् ।।

शूद्रादिस्पृष्टमप्येतत्महापातकनाशनम् । बदरीनाथनैवेद्यं विष्णुभक्तिप्रदाय्यपि ।।

लक्ष्मीः पचति नैवेद्यं भवान्यत्र निवेदकः । स्वीकरोति महाविष्णुः दोषः कथमिहोच्यते ।।

--श्रीसनत्कुमारसंहितायाम्

बदरीक्षेत्रे दानमहिमा

माषमात्रं तु यो दद्यात् सुवर्णं रजतं हि वा । जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ।।

यथाशक्त्या ब्राह्मणेभ्यो दद्यादत्र महामनाः । प्रदक्षिणं ततः कुर्याद्भक्त्या परमया युतः ।।

ततस्तीर्थेषु चागत्य दद्याद्दानानि शक्तितः । गोचर्ममात्रा **पृथिवी** येन दत्ता कुटुंबिने ।।

तेन सर्वमही दत्ता ब्राह्मणे वेदपारगे । त्रुटिमात्रं **हिरण्यं** वै दत्तं वेदविदे पुनः ।।

सुवर्णस्य तुलादानात् यत्तत्फलमवाप्नुयात् । देवालये महाविष्णोः गंगायां रोधसि प्रभो ।।

दीपा देयाश्चन्द्रगुप्त संसारपरिमुक्तये । **दीपदश्चक्षुराप्नोति स्वर्णदो वपुरुत्तमम्** ।।

अन्नदस्तृप्तिमाप्नोति धातुदो भाग्यमुत्तमम्

बदरीयात्राक्रमः

वसिष्ठारुन्धतीसंवादः

एकदा तस्य भवने धर्मदत्तो महीश्वरः । बदर्याश्रमवासी वै आययौ भिक्षितुं विशम् ।।

तस्य वै दर्शनाद्वैश्यो बभूव मलवर्जितः । पप्रच्छ तं धर्मदत्तं चन्द्रगुप्तो महामतिः ।।

कुतः समागतं विप्र कुत्रत्योऽसि महापते । मां किमाज्ञापयसि भोः किं करोमि तव प्रियम् ।।

(ब्राह्मणः क्षेत्रमाहात्म्यं सर्वं वदति)

चन्द्रगुप्त उवाच –

केन वै विधिना ब्रह्मन् कुर्याद्यात्रा रमापतेः ।

किं भोज्यो वै किमाचारो गमने बदरीपतेः ।।

ब्राह्मण उवाच

शृणु धर्मज्ञ वक्ष्यामि प्रसंगाद्यन्मया कृतम् । पृष्टस्ते सत्यधर्माय नारदोक्तं महामते ।।

सत्यधर्मो महाराजः पप्रच्छ नारदं क्वचित् । यदुक्तं तेन महता तत्सर्वं श्रुणु सुव्रत ।।

कर्तव्या बदरीयात्रा भीतेन भवबन्धनात् । संपूज्य गणपं पूर्वं स्वस्तिवाचनपूर्वकम् ।।

पुण्याहं वाचयेत्तत्र बदरीनाथमानसः । ततः संप्रार्थयेद्विप्रान् पूजितान् वसनादिभिः ।।

आज्ञापयध्वं भूदेवाः मां वः शरणमागतम् । भवतां कृपया देवा कृतयात्रो तथा पुनः ।।

इति संप्रार्थ्य विप्रांस्तु धनकार्पटिवेषकः । जितेन्द्रियः शुद्धमनाः भूमिशायी महामतिः ।।

संध्यात्रयमुपासीत एकस्थाने फलाशनः । पद्भ्यां गच्छेन्न वै याने यदीच्छेद्धर्ममुत्तमम् ।।

गोयाने गोवधः प्रोक्तो वैफल्यं हययानतः । आर्धं फलं नरारोहे तस्माद्यानं विवर्जयेत् ।।

अध्यात्मचिन्तनं कुर्वन् शृण्वन् वै तीर्थवैभवम् । गच्छेन्नारायणं स्थानं सर्वदेवैरनुष्ठितम् ।।

गंगाद्वारे समागत्य ह्यर्चयेन्नीलभैरवम् । ततः संप्रार्थयेन्नाम्नो गंगायां कृतसत्क्रियः ।।

नमो नमस्ते भगवन् नीलभैरव क्षेत्रप । अनुज्ञां देहि यात्रायै धन्यःस्यां त्रिजगत्सु वै ।।

क्षेत्रोपवासं कुर्याद्वै दिनमेकं जितेन्द्रियः । प्रातः स्नात्वा तु गंगायां नारदीयह्रदादिषु ।।

वह्नितीर्थे ततःस्नायात् नियतो यतमानसः । उपायनं यथाशक्त्या भक्त्या हि मनुजोऽर्पयेत् ।।

आकिरीटाङ्घ्रिपर्यन्तं पश्येन्नारायणं विभुम् ।

बदरीयात्रामहिमा

अन्यतीर्थे कृतं येन तपः परमदारुणं । तत्समा बदरीयात्रा मनसाऽपि प्रजायते ।।

कलिकालमनुप्राप्य मुक्तिर्येषामभीप्सिता । द्रष्टव्या बदरी तैस्तु हित्वा तीर्थान्यशेषतः ।।

चरणानां च साफल्यं कुर्याद्बदरिकागमात् । नेत्रयोश्चैव साफल्यं कुर्याद्विष्णोश्च दर्शनात् ।।

तस्य वै सफलं जन्म तस्यैव सफलं तपः ।

आगच्छन् बदरीं यस्तु कृतकृत्यत्वमाप्नुयात् । अनमंश्च हरिं देवं वंचितोऽत्र कलौ युगे ।।

बदरीक्षेत्रे आचरणीयानि

कथानां श्रवणं विष्णोः गीतनृत्योत्सवादिकम् । कुर्याद्वसन् बदर्यां तन्नाम्नां चैवानुकीर्तनम् ।।

सायाह्नेऽपि सदा कुर्यात् सन्ध्याद्यं विष्णुदर्शनम् । कालत्रये समर्थश्चेत् अपश्यन् दोषभाग् भवेत् ।।

बदरीक्षेत्रे देवानां पूजाक्रमः

कृते युगे तु सर्वेषां नरनारायणो हरिः । प्रत्यक्षं वसते तत्र भुक्तिमुक्तिप्रदायकः ।।

त्रेतायां मुनिभिर्देवैः योगिभिः दृश्यते शुभे । नान्यैः समास्थितो योगं लोकस्थितिविधायकः ।।

द्वापरे समनुप्राप्ते ज्ञानयोगोन दृश्यते । ततो ब्रह्मादयो देवाऋषयश्च तपोधनाः ।।

स्तुत्वा वाग्भिर्विचित्राभिः देवं प्रासादयन् हरिम् । ततोऽशरीरिणी वाणी प्राह तान् विधिपूर्वकान् ।।

कलौ न दर्शनं यामि सर्वधर्मविवर्जिते । यदि वो दर्शने श्रद्धा मण्डपस्य सुरेश्वराः ।।

गृहीध्वं मामकीं मूर्तिं शैलीं नारदकुण्डगाम् । ततस्तां गिरमाकर्ण्य ब्रह्माद्या हृष्टमानसाः ।।

निष्कास्य शैलीं तां दिव्यां मूर्तिं नारदकुण्डगाम् । स्थापयामासुरभ्यर्च्य स्वं स्वं धाम ययुस्ततः ।।

वैशाखे मासि ते देवा गच्छन्ति निजमन्दिरम् । ततो वैशाखमारभ्य मानवा हिमसंक्षयात् ।।

लभन्ते दर्शनं पुण्याः पापकर्मविवर्जिताः । षण्मासं दैवतैः पूज्या षण्मासं मानवैस्ततः ।।

एवं व्यवस्थया मूर्तिः तत्प्रभृत्याविरास सा ।।

बदरीनाथमाहात्म्यपुस्तकस्थापनेन पुण्यकथनम्

सर्वे मनोरथास्तस्य पूर्णाः स्युर्नात्र संशयः । इदं माहात्म्यं यद्गेहे लिखितं वर्तते प्रिये ।।

आधिव्याधिभयं नैव चोरराजाग्निजं भयम् । श्रीविष्णोर्नित्यसान्निध्यं यद्गेहे पुस्तकं त्विदम् ।।

दुःस्वप्नो नश्यते शीघ्रं रोगी मुच्येत वै गदात् ।।

ಶ್ರೀಬದರೀನಾರಾಯಣನ ಇತಿಹಾಸ

ಶ್ರೀಬದರೀನಾರಾಯಣನ ಪ್ರತಿಮೆ ಸಾಲಿಗ್ರಾಮ ಶಿಲೆ.ಧ್ಯಾನಮಗ್ನವಾದ ಚತುರ್ಭುಜಮೂರ್ತಿ.

गृहीध्वं मामकीं मूर्तिं शैलीं नारद्कुण्डगाम् ।

ततस्तां गिरमाकर्ण्य ब्रह्माद्या हृष्टमानसाः ।।

ಎಂಬ ಭಗವದುಕ್ತಿಯಂತೆ ಮೊದಲಿನಿಂದಲೇ ನಾರದಕುಂಡದಲ್ಲಿರುವ ತನ್ನ ಅನಂತ ಸನ್ನಿಧಾನ ಉಳ್ಳ ಪ್ರತಿಮೆಯನ್ನು ಅಲ್ಲಿಂದ ತೆಗೆದು ಬ್ರಹ್ಮಾದಿ ದೇವತೆಗಳು ಪ್ರತಿಷ್ಠಾಪಿಸಿದರು.ಅನಂತರ ಬೌದ್ಧರ ಪ್ರಾಬಲ್ಯ ಬಹಳವಾಯಿತು.ಆ ಮಂದಿರದಮೇಲೆ ಅಧಿಕಾರ ಚಲಾಯಿಸಿದರು.ಅವರು ಆ ಪ್ರತಿಮೆಯನ್ನು ಬುದ್ಧನ ಪ್ರತಿಮೆ ಎಂಬುದಾಗಿ ತಿಳಿದು ಪೂಜಿಸುತ್ತಿದ್ದರು. ಆಗ ಶಂಕರಾಚಾರ್ಯರು ಆ ಬೌದ್ಧರನ್ನೆಲ್ಲಾ ಪರಾಜಯಗೊಳಸಿದರು. ಅವರು ಅಲ್ಲಿಂದ ಟಿಬೆಟ್ ದೇಶಕ್ಕೆ ಓಡಿಹೋದರು. ಅವರು ಹೋಗುತ್ತಾ ಆ ಪ್ರತಿಮೆಯನ್ನು ಅಲಕನಂದೆಯಲ್ಲಿ ಹಾಕಿಹೋದರು. ಆಮೇಲೆ ಶಂಕರಾಚಾರ್ಯರು ದೇವಸ್ಥಾನ ಖಾಲಿ ಇದ್ದದ್ದನ್ನು ನೋಡಿ ಧ್ಯಾನವನ್ನು ಮಾಡಿ ತಮ್ಮ ಯೋಗಸಾಮರ್ಥ್ಯದಿಂದ ಆ ಪ್ರತಿಮೆಯನ್ನು ತೆಗೆಯಿಸಿ ಪುನಃಪ್ರತಿಷ್ಠಾಪಿಸಿದರು.ದೇವಸ್ಥಾನದ 3ನೆಯ ಅರ್ಚಕ ಬದರೀಗೆಯಾವ ಭಕ್ತರೂ ಬರುತ್ತಿಲ್ಲ ಮತ್ತು ತನಗೆ ತಿನ್ನಲು ಏನೂ ಸಿಗುತ್ತಿಲ್ಲವೆಂದು ಆ ಪ್ರತಿಮೆಯನ್ನು ಮತ್ತೆ ತಪ್ತಕುಂಡದಲ್ಲಿ ಎಸೆದ.ಆ ಸಮಯದಲ್ಲಿ ಬದರೀಯ ಹತ್ತಿರದ ಪಾಂಡುಕೇಶ್ವರದಲ್ಲಿ ಒಬ್ಬನಿಗೆ ಆವಾಗಲೇ ತಪಸ್ಸಿನಿಂದ ಸದ್ಗತಿ ಪಡೆದ ಘಂಟಾಕರ್ಣನ ಆವೇಶವಾಗಿ ಆ ಪ್ರತಿಮೆ ತಪ್ತಕುಂಡದಲ್ಲಿದೆ ಎಂಬುದಾಗಿ ಸೂಚನೆ ಆಯಿತು. ಅದನ್ನು ತಿಳಿದ

ರಾಮಾನುಜಾಚಾರ್ಯರು(ಅವರ ಸಂಪ್ರದಾಯದ ಒಬ್ಬ ಆಚಾರ್ಯರು) ಅಲ್ಲಿ ಹೋದಾಗ ಅದನ್ನು ತೆಗೆಯಿಸಿ ಪುನಃಪ್ರತಿಷ್ಠಾಪನೆ ಮಾಡಿದರು.

ಇಲ್ಲಿ ಕೇದಾರನಾಥನ ದೇವಸ್ಥಾನವಿದೆ. ಮೊದಲು ಇವನನ್ನು ದರ್ಶಿಸಿ ನಂತರ ಬದರೀನಾರಾಯಣನನ್ನು ದರ್ಶಿಸಬೇಕೆಂಬುದು ನಿಯಮ.

मण्डयन् भरतखण्डमखण्डं नादिरायणपदोऽत्र परो यः।

तं नमन् प्रचुरधीर्हरि**गीताभाष्य**मार्पयदुपायनमस्मै ।।

तेन तत्प्रवचने विहितेऽलं शुश्रुवुःप्रशयिता अपि शिष्याः।

उच्यतामिति मुहुः सपृथिव्यास्फालनं पदमहो हरिणोक्तम् ।।

नेदृशं स्थलमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः।

नास्ति विष्णुसदृशं ननु दैवं नास्मदुक्तिसदृशं हितरूपम् ।।

धर्माद्योऽजनि धर्म एव च रतिं दद्यात् स्वयोगश्रियम्

योगाभ्यासरतः स्मरादिविजयं कन्दर्पदर्पापहः ।

उत्तुङ्गाद्रिगतः सदोच्चपदवीं योषित्कदम्बेषु नः

पुत्रीवन्मतिमुर्वशी जनयिता नारायणः सद्गुणान् ।।

हस्तद्वन्द्वगचक्रशङ्खरुचिरं वृत्तोरुमध्यस्फुरत्

रक्तोत्तानकरारविन्दयुगलं पद्मासनस्थं प्रभुम् ।

विष्वङ्नारदमुख्ययोगिनिकरैः संसेव्यमानं सुधा-

वीक्षाक्षालितभक्तकिल्बिषविषं नारायणं चिन्तये ।।

।।श्रीकृष्णार्पणमस्तु।।